# सुन्दरकाण्ड द्वादश सर्गः(१२) - ॥ हनुमद्विषादः ॥

स तस्य मध्ये भवनस्य मारुतिः
लता गृहांश् चित्र गृहान् निशा गृहान् ।
जगाम सीतां प्रति दर्शनोत्सुको
न चैव तां पश्यति चारुदर्शनाम् ॥ १ ॥

स चिन्तयामास ततो महाकपिः
प्रिया मपश्यन् रघुनन्दनस्य ताम् ।
ध्रुवं हि सीता म्रियते यथा न मे
विचिन्वतो दर्शनमेति मैथिली ॥ २ ॥

सा राक्षसानां प्रवरेण जानकी
स्वशील संरक्षण तत्परा सती ।
अनेन नूनं प्रति दुष्ट कर्मणा
हता भवेदार्यपथे परे स्थिता ॥ ३ ॥

विरूप रूपा विकृता विवर्चसो
महानना दीर्घ विरूप दर्शनाः ।
समीक्ष्य सा राक्षस राज योषितो
भयाद् विनष्टा जनकेश्व रात्मजा ॥ ४ ॥

सीता मदृष्ट्वा ह्यनवाप्य पौरुषं
विहृत्य कालं सह वानरैश् चिरम् ।
न मेऽस्ति सुग्रीव समीपगा गतिः
सुतीक्ष्ण दण्डो बलवांश्च वानरः ॥ ५ ॥

दृष्ट मन्तःपुरं सर्वं दृष्टा रावण योषितः ।
न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ॥ ६ ॥

किं नु मां वानराः सर्वे गतं वक्ष्यन्ति सङ्गताः ।
गत्वा तत्र त्वया वीर किं कृतं तद् वदस्व नः ॥ ७ ॥

अदृष्ट्वा किं प्रवक्ष्यामि तामहं जनकात्मजाम् ।
ध्रुवं प्राय मुपैष्यन्ति कालस्य व्यति वर्तने ॥ ८ ॥

किं वा वक्ष्यति वृद्धश्च जाम्बवा नङ्गदश्च सः ।
गतं पारं समुद्रस्य वानराश्च समागताः ॥ ९ ॥

अनिर्वेदः श्रियो मूल मनिर्वेदः परं सुखम् ।
अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ॥ १० ॥

करोति सफलं जन्तोः कर्म यत्तत् करोति सः ।
तस्मा दनिर्वेद कृतं यत्नं चेष्टेऽहमुत्तमम् ॥ ११ ॥

भूयस्तावद् विचेष्यामि देशान् रावण पालितान् ।
आपान शाला विचितास् तथा पुष्प गृहाणि च ॥ १२ ॥

चित्र शालाश्च विचिता भूयः क्रीडा गृहाणि च ।
निष्कुटान्तर रथ्याश्च विमानानि च सर्वशः ॥ १३ ॥

इति सञ्चिन्त्य भूयोऽपि विचेतु मुपचक्रमे ।
भूमीगृहांश् चैत्य गृहान् गृहाति गृहकानपि ॥ १४ ॥

उत्पतन् निष्पतंश्चापि तिष्ठन् गच्छन् पुनः पुनः ।
अपा वृण्वंश्च द्वाराणि कपाटान् यवघाटयन् ॥ १५ ॥

प्रविशन् निष्पतंश् चापि प्रपतन् नुत्पतन्नपि ।
सर्वमप् यवकाशं स विचचार महाकपिः ॥ १६ ॥

चतुरङ्गुल मात्रोऽपि नावकाशः स विद्यते ।
रावणान्तःपुरे तस्मिन्यं कपिर् न जगाम सः ॥ १७ ॥

प्राकारान्तर रथ्याश्च वेदिकाश् चैत्य संश्रयाः ।
दीर्घिकाः पुष्करिण्यश्च सर्वं तेनाव लोकितम् ॥ १८ ॥

राक्षस्यो विविधाकारा विरूपा विकृतास् तदा ।
दृष्टा हनुमता तत्र न तु सा जनकात्मजा ॥ १९ ॥

रूपेणा प्रतिमा लोके वरा विद्याधर स्त्रियः ।
दृष्टा हनुमता तत्र न तु राघवनन्दिनी ॥ २० ॥

नागकन्या वरारोहाः पूर्णचन्द्र निभाननाः ।
दृष्टा हनुमता तत्र न तु सीता सुमध्यमा ॥ २१ ॥

प्रमथ्य राक्षसेन्द्रेण नागकन्या बलाद् धृताः ।
दृष्टा हनुमता तत्र न सा जनक नन्दिनी ॥ २२ ॥

सोऽपश्यंस्तां महाबाहुः पश्यंश्चान्या वरस्त्रियः ।
विषसाद मुहुर् धीमान् हनुमान् मारुतात्मजः ॥ २३ ॥

उद्योगं वानरेन्द्राणां प्लवनं सागरस्य च ।
व्यर्थं वीक्ष्यानिल सुतश् चिन्तां पुन रुपागमत् ॥ २४ ॥

अवतीर्य विमानाच्च हनुमान् मारुतात्मजः ।
चिन्ता मुपजगामाथ शोकोप हत चेतनः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वादशः सर्गः ॥ १२ ॥